ङीप्। २दृढद्रढिमनकारिमात्रे त्रि० स्त्रियां टाप् कापि अतद्गत्वमिति भेदः।

**दृढधन** पु० दृढं धनं निश्चयरूपा सम्पत्तिरस्य। शाक्यमुनौ ललितवि०। दृढधनुरप्यत्र। समासान्तविधेरनित्यात् नानङ्।

**दृढधन्वन्** पु० दृढं धनुरस्य अनङ् समा०। १दृढधनुष्के "राजानं दृढधन्वानं दिलीपं सत्यवादिनम्" भा०द्रो० १३१अ०। २पौरवे नृपभेदे "दक्षिणस्यस्य कम्बोजो दृढधन्वा च पौरवः" भा०आ० १८६अ०।

**दृढनिश्चय** पु० दृढः कुतर्कैरभिभवितुमशक्यतया स्थिरः निश्चयः अहमकर्त्ता भोक्ता संसारिसच्चिदानन्दाद्वितीयं ब्रह्मास्मीत्यध्यवसायोऽस्य। स्थिरमतौ संसारादुपरते अहं ब्रह्मास्मीत्यध्यवसाययुते विदुषि।

**दृढनीर** पु० दृढं कालेन दृढतां प्राप्तं नीरं यस्य। नारिकेले राजनि०। तस्य जलस्यैव क्रमशः कठिनशस्यरूपेण परिणतत्वात् तथात्वम्।

**दृढनेमि** पु० अजमीढवंश्ये सत्यधृतिनृपपुत्रे नृपभेदे। "अजमीढस्य दायादः" इत्युपक्रमे "जज्ञे सत्यधृतेः पुत्रो दृढनेमिः प्रतापवान्" हरिवं०२०अ०। दृढा नेमिरस्य। २दृढनेमिके रथे पु०। [गौरा० ङीष्।

**दृढपत्र** पु०दृढं पत्रमस्य। १वंशे २वल्वजायां स्त्री राजनि०

**दृढपाद्** त्रि०दृढः पादः पदनं ज्ञानमस्य। १दृढनिश्चये २वेधसि पु० "बहुत्वाद्दृढपादश्च विश्वात्मा जगतां पतिः" हरिवं० २०४० श्लो०। दृढः पादो मूलमस्याः समासान्तविधेरनित्यत्वान्नान्त्यलोपः समा०। २यवतिक्तायां स्त्री ३भूम्यामलक्यां स्त्री राजनि० ङीष्।

**दृढप्ररोह** पु० दृढः प्ररोहः अङ्कुरोऽस्य। वटवृक्षे राजनि०

**दृढफल** पु० दृढानि फलानि यस्य। नारिकेले राजनि०।

**दृढबन्धिनी** स्त्री दृढं बध्नाति ग्रथ्नाति स्वाश्रयं णिनि। १श्यामालतायां शब्दच०। २अशिथिलबन्धकारके त्रि०।

**दृढभूमि** पु० दृढा भूमिरवस्था यस्य। दीर्घकालनैरन्तर्यादरासेविते योगशास्त्रोक्ते मनसःस्थैर्यकरणार्थे अभ्यासभेदे "तत्र स्थितौ यत्नोऽभ्यासः" पात०सू० "चित्तस्याऽवृत्तिकस्य प्रशान्तवाहिता स्थितिः प्रयत्नः वीर्यमुत्साहः तत्संपिपादयिषया तत्साधनानुष्ठानमभ्यासः" भा० "स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढभूमिः" सू० "दीर्घकालासेवितः निरन्तरासेवितः तपसा ब्रह्मचर्येण विद्यया श्रद्धया च संपादितः सत्कारवान् दृढभूमिर्भवति। व्युत्थानसंस्कारेणानभिभूतविषय इत्यर्थः" भा० "ननु व्युत्थानसंस्कारेणानादिपरिपन्थिना प्रतिबद्धोऽभ्यासः कथं स्थित्यै कल्पत इत्यत आह स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढभूमिः यथोक्तः सोयमभ्यासो विशेषेण एवं सम्पन्नः सन् दृढावस्थो न सहसा व्युत्थानसंस्कारैरभिभूतस्थितिरूपविषयो भवति यदि पुनरेवं भूतमप्यभ्यासं कृत्वोपरमेत ततः कालपरिपाकेणाभिभवेत् तस्मान्नोपरन्तव्यमिति भावः" विवरणम्

**दृढमुष्टि** पु० दृढो मुष्टिर्धारणेऽस्य। १खड्गादौ हेमच०। दृढं बद्धः दानार्थमप्रसारितो मुष्टिरस्य। १कृपणे त्रि० दृढोमुष्टिस्तदाघातोऽस्य। दृढमुष्ट्याघातकारिणि "निष्टीतः कम्बरायां शिशुना दृढमुष्टिना" हरिवं० २०अ०।

**दृढमूल** पु० दृढं मूलमस्य। १मुञ्जतृणे २मन्थानकतृणे च राजनि० ३नारिकेले शब्दार्थकल्प०।

**दृढरङ्गा** स्त्री दृढः रङ्गो रञ्जनं यस्याः ५त०। स्फट्यां (फटकिरी) राजनि०। तद्योगेन रागस्य स्थिरतेति तस्यास्तथात्वम्।

**दृढरथ** पु० १धृतराष्ट्रपुत्रभेदे "अभयो रौद्रकर्मा च तथा दृढरथश्च यः" भा०आ०६७अ० तत्पुत्रोक्तौ अस्यैव नामान्तरं दृढरथाश्रय इति तत्र पाठान्तरम्। २काच्ययुवंश्ये नृपभेदे तद्वंशवर्णने "दृढनेमिनास्तु राजेन्द्रो जनयामास वै सुतम्। नाम्ना जयद्रथं वीरं यस्माद्दृढरथो नृपः। आसीद्दृढरथस्यापि विश्वजिज्जनमेजय!" हरिवं० ३१३अ०।

**दृढरुचि** स्त्री दृढा रुचिरस्य। १स्थिररागयुक्ते २कुशद्वीपपतेर्हिरण्यरेतसः प्रैयव्रतस्य पुत्रभेदे कुशद्वीपशब्दे २१४५ दृश्यम्।

**दृढलता** स्त्री नित्यकर्म०। पातालगरुडीलतायां राजनि०।

**दृढलोमन्** त्रि० दृढानि लोमान्यस्य। १कठिनलोमयुक्ते त्रि०स्त्रियां डाप् ङीप् वा दृढलोमा दृढलोम्नी। २सूकरे पु० शूकर्यां स्त्री शब्दच०।

**दृढवर्म्मन्** पु० दृढं वर्म यस्य। १दुर्भेदसन्नाहयुक्ते २धृतराष्ट्रपुत्रभेदे दृढक्षात्रशब्दे दृश्यम्।

**दृढवल्कल** पु० दृढं वल्कलमस्य। १पूगवृक्षे २अम्बष्ठायां स्त्री तत्र दृढत्वचापि राजनि०। ३कठिनवल्कलयुक्ते त्रि०।

**दृढवल्का** स्त्री दृढं वल्कमस्याः। अम्बष्ठायां राजनि०।

**दृढबीज** पु० दृढं बीजमस्य। १बदरे २चक्रमर्दे ३बर्बुरे च